# पिप्पलाद ऋषिकृत शनि स्तोत्रं

यः पुरा नष्टराज्याय, नलाय प्रददौ किल ।
स्वप्ने तस्मै निजं राज्यं, स मे सौरिः प्रसीद तु ।।1।।

केशनीलांजन प्रख्यं, मनश्चेष्टा प्रसारिणम् ।
छाया मार्तण्ड सम्भूतं, नमस्यामि शनैश्चरम् ।।2।।

नमोऽर्कपुत्राय शनैश्चराय, नीहार वर्णांजनमेचकाय ।
श्रुत्वा रहस्यं भव कामदश्च, फलप्रदो मे भवे सूर्य पुत्रं ।।3।।

नमोऽस्तु प्रेतराजाय, कृष्णदेहाय वै नमः ।
शनैश्चराय ते तद्व शुद्धबुद्धि प्रदायिने ।।4।।

य एभिर्नामाभिः स्तौति, तस्य तुष्टो ददात्य सौ ।
तदीयं तु भयं तस्यस्वप्नेपि न भविष्यति ।।5।।

कोणस्थः पिंगलो बभ्रूः, कृष्णो रोद्रोऽन्तको यमः ।
सौरिः शनैश्चरो मन्दः, प्रीयतां मे ग्रहोत्तमः ।।6।।

नमस्तु कोणसंस्थाय पिंगलाय नमोऽस्तुते ।
नमस्ते बभ्रूरूपाय कृष्णाय च नमोऽस्तुते ।।7।।

नमस्ते रौद्र देहाय, नमस्ते बालकाय च ।
नमस्ते यज्ञ संज्ञाय, नमस्ते सौरये विभो ।।8।।

नमस्ते मन्दसंज्ञाय, शनैश्चर नमोऽस्तुते ।
प्रसादं कुरु देवेश, दीनस्य प्रणतस्य च ।।9।।

eAstroHelp